*AH-III/SNS-303C-7/19*

# B.A. 3rd Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 30913** **Course Code : AH/SNS-303C-7**

Course Title: History of Vedic Literature and Theory of Self

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** *पञ्च*प्रश्नानाम् उत्तराणि लिखत। *एकस्य* उत्तरं संस्कृतभाषया देवनागरलिप्या च अवश्यमेव लेख्यम्। 2×5=10

(a) ऋग्वेदस्य कति शाखा:? तासां नामानि लिखत।

(b) ऋग्वेदे कति मण्डलानि सन्ति? नवममण्डलस्य नाम किम्?

(c) ब्राह्मणं नाम किम्? अथर्ववेदस्य ब्राह्मणस्य नाम लेख्यम्।

(d) वेदाङ्गानि कति? तासां नामानि लिखत।

(e) ईशोपनिषत् कस्मिन् वेदे वर्तते? अस्या: अपरं नाम किम्?

(f) आरण्यकं नाम किम्? सामवेदस्य आरण्यकानां नामानि लिखत।

(g) अथर्ववेदसंहितायां कति काण्डानि सन्ति? अस्य वेदस्य अपरं नाम किम्?

(h) उपनिषच्छब्दस्य व्युत्पत्ति: लेख्या। कृष्णयजुर्वेदस्य उपनिषद्द्वयस्य नाम लिखत।

**2.** *द्वयो:* प्रश्नयो: संस्कृतभाषया देवनागरलिप्या च उत्तरं लिखत। 5×2=10

(a) स यथा वीणायै वाद्यमानायै न बाह्याञ्-शब्दाञ्-शक्नुयाद्
ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीत:।। — व्याख्या करणीया।

(b) एतेभ्यो भूतेभ्य: समुत्थाय तान्येवानुविनश्यति न
प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्य:। — मन्त्रांशस्य व्याख्या कार्या।

(c) सा होवाच मैत्रेयी। यत्नु म इयं भगो: सर्वा पृथिवी वित्तेन
पूर्णा स्यात् कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो
यथैवोपकरणवतां जीवितं तथैव ते जीवितं
स्यादमृतत्वस्य तु नाशाऽस्ति वित्तेनेति। — व्याख्या करणीया।

**3.** निम्नप्रदत्तेषु *द्वयोः* मन्त्रयोः संस्कृतभाषया देवनागरलिप्या च व्याख्या कार्या। 5×2=10

(a) यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः।

तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्।।

(b) एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम्।

विरजः पर आकाशादज आत्मा महान् ध्रुवः।।

(c) अनन्दा नाम ते लोका अन्धेन तमसावृताः।

तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जनाः।।

(d) यदैतमनुपश्यत्यात्मानं देवमञ्जसा।

ईशानं भूतभव्यस्य न ततो विजुगुप्सते।।

**4.** *एकस्य* प्रश्नस्य संस्कृतभाषया देवनागरलिप्या च उत्तरं लिखत। 10×1=10

(a) किं नाम संवादसूक्तम्? ऋग्वेदस्य संवादसूक्तम् आश्रित्य कश्चन लघुप्रबन्धो विरच्यताम्।

(b) यजुर्वेदस्य विषयसारं संक्षेपेण उल्लिख्य अस्य वेदस्य माहात्म्यम् आलोच्यताम्।

(c) बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणस्य नाम किम्? समासेन अस्य ब्राह्मणस्य प्रतिपाद्यविषया निरूपणीयाः।

---